# Shri Nikhileshvarananda Kavacham

# શ્રીનિખિલેશ્વરાનન્દકવચમ્

## Document Information

Text title : Nikhileshvarananda Kavacham

File name : nikhileshvarAnandakavacham.itx

Category : deities_misc, gurudev, kavacha

Location : doc_deities_misc

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Latest update : June 20, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 20, 2026

*sanskritdocuments.org*

# શ્રીનિખિલેશ્વરાનન્દકવચમ્

વિનિયોગઃ ।
ૐ અસ્ય શ્રીનિખિલેશ્વરાનન્દકવચસ્ય શ્રીમુદ્ગલઋષિઃ, અનુષ્ટુપ્છન્દઃ,
શ્રી ગુરુદેવો નિખિલેશ્વરાનન્દ પરમાત્મા દેવતા, મહોસ્તવં રૂપં ચ
ઇતિ બીજમ્, પ્રબુદ્ધં નિર્નિત્યં ઇતિ કીલકમ્, અથૌ નેત્રં પૂર્ણં
ઇતિ કવચમ્, શ્રી ભગવત્પાદ નિખિલેશ્વરાનન્દપ્રીતિદ્વારા
મમ સમ્પૂર્ણ રક્ષણાર્થે, સ્વકૃતેન આત્મ-મન્ત્ર-યન્ત્ર-તન્ત્ર
રક્ષણાર્થે ચ પારાયણે વિનિયોગઃ ।
ઋષ્યાદિન્યાસઃ -
શ્રીમુદ્ગલઋષયે નમઃ શિરસિ ।
અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
શ્રી ગુરુદેવો નિખિલેશ્વરાનન્દપરમાત્મા દેવતાયૈ નમઃ હૃદિ ।
મહોસ્તવં રૂપં ચ ઇતિ બીજાય નમઃ ગુહ્યે ।
પ્રબુદ્ધં નિર્નિત્યં ઇતિ કીલકાય નમઃ પાદયોઃ ।
અથૌ નેત્રં પૂર્ણં ઇતિ કવચાય નમઃ સર્વાઙ્ગે ।
શ્રી ભગવત્પાદ નિખિલેશ્વરાનન્દ પ્રીતિ દ્વારા મમ સમ્પૂર્ણ
રક્ષણાર્થે, સ્વકૃતેન આત્મ-મન્ત્ર-યન્ત્ર-તન્ત્ર રક્ષણાર્થે
ચ પારાયણે વિનિયોગાય નમઃ અઞ્જલૌ ॥

કરન્યાસઃ -
શ્રી સર્વાત્મને નિખિલેશ્વરાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
શ્રી મન્ત્રાત્મને પૂર્ણેશ્વરાય તર્જનીભ્યાં નમઃ ।
શ્રી તન્ત્રાત્મને વાગીશ્વરાય મધ્યમાભ્યાં નમઃ ।
શ્રી યન્ત્રાત્મને યોગીશ્વરાય અનામિકાભ્યાં નમઃ ।
શ્રી શિષ્યપ્રાણાત્મને કનિષ્ઠિકાભ્યાં નમઃ ।
શ્રી સચ્ચિદાનન્દપ્રિયાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

હૃદયાદિન્યાસઃ -

શ્રીંશેશ્વરઃ હૃદયાય નમઃ ।
હ્રીંશેશ્વરઃ શિરસે સ્વાહા ।
ક્લીંશેશ્વરઃ શિખાયૈ વષટ્ ।
તપસેશ્વરઃ કવચાય હુમ્ ।
તાપેશેશ્વરઃ નેત્રત્રયાય વૌષટ્ ।
એકેશ્વરઃ અસ્ત્રાય ફટ્ ॥

મૂલ કવચમ્ -
ૐ શિરઃ સિદ્ધેશ્વરઃ પાતુ લલાટં ચ પરાત્પરઃ ।
નેત્રે નિખિલેશ્વરાનન્દઃ નાસિકા નરકાન્તકઃ ॥ ૧॥

કર્ણૌ કાલાત્મકઃ પાતુ મુખં મન્ત્રેશ્વરસ્તથા ।
કણ્ઠં રક્ષતુ વાગીશઃ ભુજૌ ચ ભુવનેશ્વરઃ ॥ ૨॥

સ્કન્ધૌ કામેશ્વરઃ પાતુ હૃદયં બ્રહ્મવર્ચસઃ ।
નાભિં નારાયણો રક્ષેત્ ઊરું ઊર્જસ્વલોઽપિ વૈ ॥ ૩॥

જાનુનિ સચ્ચિદાનન્દઃ પાતુ પાદૌ શિવાત્મકઃ ।
ગુહ્યં લયાત્મકઃ પાયાત્ ચિત્તં ચિન્તાપહારકઃ ॥ ૪॥

મદનેશઃ મનઃ પાતુ પૃષ્ઠં પૂર્ણપ્રદાયકઃ ।
પૂર્વં રક્ષતુ તન્ત્રેશઃ યન્ત્રેશઃ વારુણીં તથા ॥ ૫॥

ઉત્તરં શ્રીધરઃ રક્ષેત્ દક્ષિણં દક્ષિણેશ્વરઃ ।
પાતાલં પાતુ સર્વજ્ઞઃ ઊર્ધ્વં મે પ્રાણસંજ્ઞકઃ ॥ ૬॥

કવચેનાવૃતો યસ્તુ યત્ર કુત્રાપિ ગચ્છતિ ।
તત્ર સર્વત્ર લાભઃ સ્યાત્ કિઞ્ચિદત્ર ન સંશયઃ ॥ ૭॥

ફલશ્રુતિઃ ।
યં યં ચિન્તયતે કામં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ।
ધનવાન્ બલવાન્ લોકે જાયતે સમુપાસકઃ ॥ ૮॥

ગ્રહભૂતપિશાચાશ્ચ યક્ષગન્ધર્વરાક્ષસાઃ ।
નશ્યન્તિ સર્વવિઘ્નાનિ દર્શનાત્ કવચેનાવૃતમ્ ॥ ૯॥

ય ઇદં કવચં પુણ્યં પ્રાતઃ પઠતિ નિત્યશઃ ।
સિદ્ધાશ્રમઃ પદારૂઢઃ બ્રહ્મભાવેન ભૂયતે ॥ ૧૦॥

॥ હરિઃ ૐ તત્સત્ શ્રીનિખિલબ્રહ્માર્પણમસ્તુ ॥

ઇતિ શ્રીનિખિલેશ્વરાનન્દકવચં સમ્પૂર્ણમ્ ।

It is important to observe that the Kavacham itself declares "Shri Gurudevo Nikhileshwarananda as Paramatma Devata." In other words, the deity invoked is Guru-tattva or the spiritual principle represented by Nikhileshwaranand, not merely the historical person Narayan Dutt Shrimali.

The text repeatedly invokes protective forms such as Siddheshvara, Kameshvara, Vagisha, Narayana, and others as aspects of that Guru principle. In many traditions, the Guru is treated as a direct object of worship.

Encoded and proofread by Durga Sharma

*Shri Nikhileshvarananda Kavacham*

pdf was typeset on June 20, 2026

Please send corrections to *sanskrit@cheerful.com*